प्रयोजनानुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणवत्तान्तमनुहरति तथापि कालान्तरस्थित्या घटादिकं स्वरूपतो विशेषणतश्च व्यवच्छिन्नं, तद्विज्ञानेन स्वभाववलात् स्वविशेषणत्वेनोपादीयते। नन्वेवमत्यन्तासद्भवितुमर्हति तस्य स्वरूपतो विशेषणतश्च व्यवच्छिन्नतयानङ्गीकारात् कुत स्वभावतोविज्ञानं सम्बन्धि निरूच्यते न।उक्तमत्र असतोऽपि तदेव रूपं तस्य नियतस्वरूपस्यैव नियतविशेषणस्यैवासत्त्वादन्यथातिप्रसङ्गात् ख्यातिविषयेण दत्तोत्तरत्वाच्चेत्यलमतिविस्तरेण"। खण्डनखण्डखाद्यम्। [२अव्यक्तत्वे च।

**असत्ता** स्त्री असतोभावः तल्। १अविद्यमानत्वे २ असाधुत्वे

**असत्त्व** न० असतो भावः त्व। १अविद्यमानत्वे २अव्यक्तत्वे ३असाधुत्वे च सत्त्वं द्रव्यं न०त०। ४द्रव्यभिन्ने "सोऽसत्त्वप्रकृतिर्गुणः" इति फणिभा०। "क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः। असत्त्वरूपता तस्या इयमेवावधार्य्यताम्" इत्युक्तायां लिङ्गसंख्यानन्वयिन्यां कर्त्तृकर्मत्वभिन्नकारकत्वशून्यायां साध्यरूपयां ५क्रियायाञ्च। सत्त्वं प्रकाशादिसम्पादकं प्रकृतेर्गुणभेदः न०त०। तद्भिन्ने ६रजसि ७तमसि च न०। सत्त्वं जन्तुमात्रम् न०ब०। ८जन्तुशून्ये त्रि०। सत्त्वं सात्त्विकः गुणभेदः। ९तच्छून्ये तामसादिगुणयुते त्रि०। सत्त्वमर्थक्रियाकारित्वम् अभावे न०त०। १०प्रयोजनानुपयुक्ते उदा० असत्ख्यातिशब्दे "सत्त्वासत्त्वकथा वृथा" खण्डनख०।

**असत्पथ** पु० असन् पन्थाः अच् समा०। १शास्त्रादिनिषिद्धे कार्य्यादौ २दुष्टे वर्त्मनि च। [दुष्टपथालम्बने।

**असत्परिग्रह** पु० असतः पतस्य परिग्रहः स्वीकारः।

**असत्प्रतिग्रह** पु० असतः निषिद्धस्य तिलादेः असद्भ्योवा शूद्रादिभ्यः प्रतिग्रहः। १निषिद्धद्रव्यप्रतिग्रहे २शूद्रादिभ्यः प्रतिग्रहे च। प्रतिग्रहश्च अदृष्टार्थत्यक्तद्रव्यस्वीकारः। पारितोषिकोपढौकनादिग्रहणे तु न दोषः। विवरणमप्रतिग्राह्यशब्दे दृश्यम्। "शतसहस्रमसत्प्रतिग्रहेष्विति" विष्णु० "असत्प्रतिग्रहेषु उभयतोमुख्यादिप्रतिग्रहेष्विति" शु०त० रघुनन्दनः।

**असत्य** न० विरोधे न०त०। सत्यभिन्ने १मिथ्याभूते। २स्वार्थके वाक्यादौ "अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम्" मनुः। असत्यवादी असत्यभाषी असत्यवचनः। ३ तत्प्रयोक्तरि मिथ्याभूते ४वस्तुनि च त्रि०। "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इति गीता। असत्यत्वं वस्तुस्वभावविरोधिधर्मभेदः वाक्यस्य तु तथाभूतपदार्थप्रतिपादकत्वेन यथा इदं रजतमितिवाक्यं शुक्तिकायां रजतत्तादात्म्यं प्रतिपादयत् असत्यं भवति एवमन्यदपि। सत्यत्वञ्च त्रैकालिकबाधशून्यत्वम् तच्छून्यमसत्यत्वम्। शंयुप्रजापतेः ५भार्य्याभेदे, स्त्री "शंयोरप्रतिमा भार्य्या सत्याऽसत्याच धर्मजा" भा०व०प०२१९ अध्या०।

**असत्यसन्ध** त्रि० असत्ये सन्धाऽस्य। १स्वपार्थाभिसन्धानवति २अन्यथास्थितस्यात्मनोऽन्यथारूपाभिमानवति च। यथा देहादिषु असत्येषु आत्माभिमानोऽसत्यसन्धा। अत एव छा०उप० तस्य अनर्थहेतुत्वं दृष्टान्तेन समर्थितम्। "पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपाहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति स यदि तस्य कर्त्ता भवति तत एवान्तमात्मानं कुरुते सोऽन्ताभिसन्धोऽन्तेनात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते॥ अथ यदि तस्याकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते। स यथा तत्र नादह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो!" "यथा सोम्य! पुरुषं चौर्य्यकर्म्मणि सन्दिह्यमानं निग्रहाय परीक्षणाय चोतापि हस्तगृहीतं बद्धहस्तमानयन्ति राजपुरुषाः। किं कृतवानयमिति पृष्टाश्चाहुरपाहार्षीद्धनमस्यायम्। ते चाहुः किमपहरणमात्रेण बन्धनमर्हति। अन्यथा दत्तेऽपि धने बन्धनप्रसङ्गादित्युक्ताः पुनराहुः स्तेयमकार्षीच्चौर्य्येण धनमपाहार्षीदिति। तेष्वेवं वदत्सु इतरोऽपह्नुते नाहं तत्कर्त्ता इति। ते चाहुः सन्दिह्यमानाः स्तेयमकार्षीस्त्वमस्य धनस्येति। तस्मिंश्चापह्नुवति आहुः परशुमस्मै तपतेति शोधयत्वात्मानमिति स यदि तस्य स्तैन्यस्य कर्त्ता भवति बहिश्चापह्नुते स एवम्भूतस्तत एवानृतमन्यथा आत्मानं कुरुते स तथानृताभिसन्धोऽनृतेनात्मानमन्तर्द्धाय परशुं तप्तं मोहात् प्रतिगृह्णाति स दह्यतेऽथ हन्यते राजपुरुषैः स्वकृतेनानृताभिसन्धिदोषेण। अथ यदि तस्य कर्म्मणोऽकर्त्ता भवति तत एव सत्यमात्मानं कुरुते स तया स्तैन्याकर्तृतयात्मानमन्तर्द्धाय परशुं तप्तं प्रतिगृह्णाति सत्याभिसन्धः सन्न दह्यते सत्यव्यवधानादथ मुच्यते च स्वपाभियोक्तृभ्यः। तप्तपरशुहस्ततलसंयोगस्य तुल्यत्वेऽपि स्तेयकर्त्त्रकर्त्रोः,अनृताभिसन्धो दह्यते न तु सत्याभिसन्धः। स यथा सत्याभिसन्धस्तप्तपरशुग्रहणकर्म्मणि सत्यव्यवहितहस्ततलत्वान्नादाह्येत न